শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমন্নিগমান্তমহাদেশিকৈঃ অনুগৃহীতম্

# ॥ শ্রী কামাসিকাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রী কামাসিকাষ্টকম্॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রুতীনামুত্তরং ভাগং ৱেগৱত্যাশ্চ দক্ষিণম্।
কামাদধিৱসন্ জীযাৎ কশ্চিদদ্ভুতকেসরী॥ **1**॥

তপনেন্দ্ৱগ্নিনযনঃ তাপানপচিনোতু নঃ।
তাপনীযরহস্যানাং সারঃ কামাসিকাহরিঃ॥ **2**॥

আকণ্ঠমাদিপুরুষং
কণ্ঠীরৱমুপরি কুণ্ঠিতারাতিম্।
ৱেগোপকণ্ঠসঙ্গাৎ
ৱিমুক্তৱৈকুণ্ঠবহুমতিমুপাসে॥ **3**॥

বন্ধুমখিলস্য জন্তোঃ
বন্ধুরপর্যঙ্কবন্ধরমণীযম্।
ৱিষমৱিলোচনমীডে
ৱেগৱতীপুলিনকেলিনরসিংহম্॥ **4**॥

স্ৱস্থানেষু মরুদ্গণান্ নিযমযন্ স্ৱাধীনসর্ৱেন্দ্রিযঃ
পর্যঙ্কস্থিরধারণাপ্রকটিতপ্রত্যঙ্মুখাৱস্থিতিঃ।
প্রাযেণ প্রণিপেদুষাং প্রভুরসৌ যোগং নিজং শিক্ষযন্
কামানাতনুতাদশেষজগতাং কামাসিকাকেসরী॥ **5**॥

ৱিকস্বরনখস্বরুক্ষতহিরণ্যৱক্ষঃস্থলী -
নিরর্গলৱিনির্গলদ্রুধিরসিন্ধুসন্ধ্যাযিতাঃ।
অৱন্তু মদনাসিকামনুজপঞ্চৱক্ত্রস্য মাম্
অহম্প্রথমিকামিথঃপ্রকটিতাহৱা বাহৱঃ॥ 6॥

সটাপটলভীষণে সরভসাট্টহাসোদ্ভটে
স্ফুরৎক্রুধি পরিস্ফুটদ্ভ্রুকুটিকেঽপি ৱক্ত্রে কৃতে।
কৃপা কপটকেসরিন্ দনুজডিম্ভদত্তস্তনা
সরোজসদৃশা দৃশা ৱ্যতিভিষজ্য তে ৱ্যজ্যতে॥ 7॥

ৎৱযি রক্ষতি রক্ষকৈঃ কিমন্যৈঃ
ৎৱযি চারক্ষতি রক্ষকৈঃ কিমন্যৈঃ।
ইতি নিশ্চিতধীঃ শ্রযামি নিত্যং
নৃহরে ৱেগৱতীতটাশ্রযং ৎৱাম্॥ 8॥

ইত্থং স্তুতঃ সকৃদিহাষ্টভিরেষ পদ্যৈঃ
শ্রীৱেঙ্কটেশরচিতৈস্ত্রিদশেন্দ্রৱন্দ্যঃ।
দুর্দান্তঘোরদুরিতদ্ৱিরদেন্দ্রভেদী
কামাসিকানরহরির্ৱিতনোতু কামান্॥ 9॥

॥ ইতি শ্রী কামাসিকাষ্টকং সমাপ্তম্॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥